# अभि-अधि-परीणां कर्मप्रवचनीयत्वम्

## अभिरभागे

**सूत्रार्थः** - अभागे = लक्षणेत्थम्भूताख्यानवीप्सासु अर्थेषु द्योत्येषु अभिः कर्मप्रवचनीयसंज्ञको भवति।

**उदाहरणानि** -

- जयः हरिम् अभि वर्तते।
- जयन्तः हरिमभि भक्तो वर्तते।
- देवं देवम् अभिसिञ्चति।

**भागे तु न** - यदत्र ममाभिष्यात् तद् दीयताम्। कर्मप्रवचनीयत्वाभावे 'उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभति...' इति सूत्रेण उपसर्गात्परस्य षत्वं भवति।

## अधिपरी अनर्थकौ

**सूत्रार्थः** - विशेषार्थरहितौ अधिपरी कर्मप्रवचनीयसंज्ञकौ भवतः।

**उदाहरणानि** -

भवान् कुतोऽध्यागच्छति।

भवान् कुतः पर्यागच्छति।

कर्मप्रवचनीसंज्ञया गतिसंज्ञाया बाधात् 'गतिर्गतौ' इति सूत्रेण 'अधि-पर्योः' अनुदात्तत्वं न भवति।

**विशेषः** - प्रादीनां कर्मप्रवचनीयत्वे गति-उपसर्गसंज्ञयोः बाधो भवति।

# सु-अत्योः कर्मप्रवचनीयत्वम्

## सुः पूजायाम्

**सूत्रार्थः** - पूजार्थे द्योत्ये सुः कर्मप्रवचनीयसंज्ञको भवति।

**उदाहरणानि-**

मया उद्यानं सुसिक्तम्।

भवता देवः सुस्तुतः।

उभयोः कर्तृतृतीयायाः प्राधान्यं कारकविभक्तित्वात्।

**पूजा-भिन्नार्थे तु-**

सुषिक्तं किं तवात्र? (आक्षेपो वर्तते)

## अतिरतिक्रमणे च

**सूत्रार्थः** - पूजायाम् अतिक्रमणे चार्थे द्योत्ये अतिः कर्मप्रवचनीयसंज्ञको भवति।

**उदाहरणानि-**

अति देवान् कृष्णः। **कृष्णः देवेभ्योऽधिकः पूज्यतमः।**

अतिसिक्तमेव भवता।

भवता अत्यन्तं सिक्तम्।

# अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु

**सूत्रार्थः** – पदार्थ–सम्भावन–अन्ववसर्ग–गर्हा–समुच्चयानां द्योतकतायाम् अपिः कर्मप्रवचनीयसंज्ञको भवति।

**पदार्थः** = **अप्रयुज्यमानपदस्यार्थः** – सर्पिषोऽपि स्यात् (सम्भावनायां लिङ्)। सर्पिषो बिन्दुमात्रं स्यात्।

**सम्भावनम्** = **शक्त्युत्कर्षमाविष्कर्तुम् अत्युक्तिः** – अपि स्तुयाद् हरिम्। अवाङ्मनसगोचरं हरिं स्तोतुं सम्भवति।

**अन्ववसर्गः** = **कामचारानुज्ञा**– अपि स्तुहि। प्रभुं स्तुहि मा वा यथेष्टं कुरु।

**गर्हा** = **निन्दनम्**– धिग् देवदत्तम्, अपि भुञ्जीत पशुम्।

**समुच्चयः** – अपि सिञ्च, अपि स्तुहि – उभयं कुरु।

# कालाध्वनोरत्यन्तसंयोगे

**सूत्रार्थः** - काल-अध्ववाचिशब्देषु द्वितीया विभक्तिः भवति, अत्यन्तसंयोगे गम्ये।

**अन्तः = विच्छेदः, तम् अतिक्रान्तः, तादृशः संयोगः।**

**उदाहरणानि-**

मासं कल्याणी। मासम् अधीते।

मासं गुडधानाः।

क्रोशं कुटिला नदी। क्रोशम् अधीते। क्रोशं गिरिः।

**यामेव रात्रिं ते दूताः प्रविशन्ति स्म तां पुरीम्।**
**भरतेनापि तां रात्रिं स्वप्नः दृष्टोऽयमप्रियः॥**

अयोध्याकाण्डः, 69 सर्गः।

**अत्यन्तसंयोगे किम्?** मासस्य द्विः अधीते।